प्रवेश सं०

विषयः धर्मशास्त्रीयं

क्रम सं०

नाम तिथि निर्णय.

ग्रन्थकार

पत्र सं० १-२१

श्लोक सं०

अक्षर सं० (पंक्तौ) 40

पंक्ति सं० (पृष्ठे) १०

आकारः ८.५. x ३.८.

लिपिः दे.ना.

आधारः का.

13906

वि० विवरणम् अपू.

पी० एस० यू० पी०--७७ एस० सी० ई०--१९५९--५० ०००

अ. ८१५१

Indira Gandhi National Centre for the Arts

॥श्रीगणेशायनमः॥तिथिनिर्णयप्रारंभः॥चैत्रशुक्लप्रतिपदिवत्सरारंभः॥ॐतत्रऔदयिकीतिथिर्ग्राह्या॥चैत्रे
मासिजगद्ब्रह्मासमर्ज्जप्रथमेहनि॥शुक्लपक्षेसमग्रंतुतदासूर्योदयेसति॥इतिहेमाद्रौब्राह्मोक्तेः॥दिनद्वयेतद्व्या
प्तौवापूर्वैव॥वत्सरादौवसंतादौबलिराज्येतथैवच॥पूर्वविद्धैवकर्त्तव्याप्रतिपत्सर्वदाबुधैरितिगोविंदार्णवेव
द्धवशिष्ठोक्तेः॥चैत्रस्यमलमासत्वेतुतत्रैववत्सरारंभइत्येके॥शुद्धएवेत्यपरे॥अत्रतैलाभ्यंगोनित्यः॥वत्सरादौव
संतादौबलिराज्येतथैवच॥तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यतइति॥वृद्धवशिष्ठोक्तेः॥अस्यामेवनवरात्रारंभ॥
नत्रपरयुता॥अमायुक्तानकर्त्तव्याप्रतिपच्चंडिकार्चने॥मुहूर्तमात्राकर्त्तव्याद्वितीयायांगुणान्वितेतिदेवीपुराण
त्॥अत्रप्रपादानमुक्तमपरार्केभविष्ये॥अतीतेफाल्गुनेमासिप्राप्तेचैत्रमहोत्सवे॥पुण्येन्हिविप्रकथितेप्रपादान
समारभेदित्युपक्रम्य॥ततश्चोत्सर्ज्जयेद्विद्वान्मंत्रेणानेनमानवः॥प्रपेयंसर्वसामान्याभूतेभ्यःप्रतिपादिता॥अ
स्याःप्रदानात्पितरस्तृप्यंतुहिपितामहाः॥अनिवार्यंततोदेयंजलंमासचतुष्टयमितितद्या॥प्रपादातुमश
क्तेनविशेषाद्धर्मीप्सुना॥प्रत्यहंधर्मघटकोवस्त्रसंवेष्टिताननः॥ब्राह्मणस्यगृहेदेयः॥शीतामलजल १

पि

शुचिः॥तत्रमंत्रः॥एषधर्मघटोदत्तइति॥अनेनविधिनायस्तुधर्मकुंभंप्रयच्छति॥प्रपादानफलंसोपिप्राप्नोतीहनसंश
यइति॥चैत्रशुक्लतृतीयायांगौरीमीश्वरसंयुतां॥संपूज्यदोलोत्सवंकुर्यात्॥तथाचनिर्णयामृतेदेवीपुराणे॥
तृतीयायांयजेद्देवींशंकरेणसमन्वितां॥कुंकुमागरुकर्पूरमणिवस्त्रसुगंधकैः॥स्रग्गंधधूपदीपैश्चदमनेनवि स ३
शेषतः॥आंदोलयेत्ततोवत्सशिवोमासचतुष्टयेसदेति॥इयंपराग्राह्या॥मुहूर्त्तमात्रसत्वेपिदिनेगौरीव्रतंपरेति
माधवोक्तेः॥अत्रैवसौभाग्यशयनव्रतमुक्तंमात्स्ये॥वसंतमासमासाद्यतृतीयायांजनप्रिये॥सौभाग्यायसदा
स्त्रीभिःकार्यंपुत्रसुखेप्सुभिरिति॥इयंचमन्वादिः॥शुक्लपक्षस्थितत्वाच्चपौर्वाह्णिकीग्राह्या॥पूर्वाह्णेचसदा
ग्राह्या॥शुक्लामनुयुगादयः॥दैवेकर्मणिपित्र्येचकृष्णेचैवापराह्णिके॥इतिगालववचनात्॥हेमाद्रौकालादर्शेतु
पित्र्येअपराह्णकत्वमेवोक्तं॥अत्रचश्राद्धमुक्तंमात्स्ये॥कृतंश्राद्धंविधानेनमन्वादिषुयुगादिषु॥हायनानिद्वि
साहस्रंपितॄणांतृप्तिदंभवेत्॥अधिमासेपीदंकर्त्तव्यं॥मन्वादिकंतैर्थिकंचकुर्यान्मासद्वयेपिचेतिस्मृतिचंद्रि
कोक्तेः॥अत्रपिंडदानंनास्ति॥विषुवायनसंक्रांतिमन्वादिषुयुगादिषु॥विहायपिंडनिर्वापंसर्वश्राद्धंसमा
चरेदिति॥कालादर्शोक्तेः॥अकरणेप्रायश्चित्तमुक्तंमृग्विधाने॥त्वंभुवःप्रतिमंत्रंचशतवारंजलेजपेत्॥

Indira Gandhi National Centre for the Arts

२ मन्वादयोयदान्यूनाःकुरुतेनैवचापदीति ॥ एवंषण्णवतीश्राद्धान्यपिनित्यानि ॥ तेषामयंसंग्रहः ॥ अमाम
नुयुगक्रांतिधृतिपातमहालयाः ॥ अन्वष्टक्यंचपूर्वेद्युःषण्णवत्योष्टकास्तथेति ॥ चैत्रशुक्लतृतीयामत्स्य
जयंती ॥ चैत्रशुक्लपंचमीत्यन्ये ॥ आषाढशुक्लैकादशीत्यपरे ॥ इयंचतदुपासकानांनित्या ॥ अन्येषांतु
काम्या ॥ चैत्रशुक्लपंचमीकल्पादिः ॥ अत्रस्नानदानादिमहाफलं ॥ चैत्रशुक्लाष्टम्यांभवान्याउत्पत्तिः ॥ तत्र
युग्मवाक्यात्परागाह्या ॥ अत्रभवानीयात्रोक्ता ॥ काशीखंडे ॥ भवानीयस्तुपश्येतशुक्लाष्टम्यांमधौन
रः ॥ नजातुशोकंलभतेसदानंदमयोभवेदिति ॥ अत्रैवाशोककलिकाप्राशनमुक्तंहेमाद्रौलैंगे ॥ अशो
ककलिकाश्चाष्टौयेपिबंतिपुनर्वसौ ॥ चैत्रेमासिसिताष्टम्यांनतेशोकमवाप्नुयुः ॥ प्राशनमंत्रस्तु ॥ त्वाम
शोकंवराभीष्टंमधुमाससमुद्भवं ॥ पिबामिशोकसंतप्तोमामशोकंसदाकुरुइति ॥ रूवीचंद्रोदयेविष्णुः ॥
पुनर्वसुबुधोपेताचैत्रेमासिसिताष्टमी ॥ प्रातस्तुविधिवत्स्नात्वावाजपेयफलंलभेत् ॥ चैत्रशुक्लनव
मीरामनवमी ॥ साचमध्याह्नव्यापिनीग्राह्या ॥ उक्तंचागस्त्यसंहितायां ॥ चैत्रेशुक्लेतुनवमीपुन
र्वसुयुतायदि ॥ सैवमध्याह्नयोगेनमहापुण्यतमाभवेदिति ॥ तथा ॥ चैत्रेमासिनवम्यांतुजातोरा २

मःस्वयंहरिः ॥ पुनर्वस्वृक्षसंयुक्तासातिथिःसर्वकामदा ॥ केवलापिसदोपोष्यानवमीशब्दसंग्र
हादिति ॥ दिनद्वयेमध्याह्नव्याप्तौतदभावेवापुनर्वसुयुतामपिपूर्वांत्यक्त्वापरैव ॥ तदुक्तंतत्रैव ॥
नवमीचाष्टमीविद्धात्याज्याविष्णुपरायणैः ॥ अविद्धमुपरायणैरितिवदतायदाप्रातस्त्रिमुहू
र्तानवमीदशमीचतस्मिन्नेवदिनेसमाप्यतेतदास्मार्तानामुत्तरदिवसेएकादशीनिमित्तोप
वासेननवमीव्रतांगपारणलोपोमाभूदिति ॥ तत्रस्मार्तैरष्टमीविद्धैवग्राह्या ॥ वैष्णवैस्तु
परेतिसूचितमितिबोध्यं ॥ इदंचव्रतंचकाम्यंच ॥ उपोषणंजागरणंपितृनुद्दिश्यतर्पणं ॥ त
स्मिन्दिनेतुकर्तव्यंब्रह्मप्राप्तिमभीप्सुभिः ॥ यस्तुरामनवम्यांतुभुंक्तेमोहाद्विमूढधीः ॥ कुंभी
पाकेषुघोरेषुपच्यतेनात्रसंशयः ॥ इत्यगस्त्यसंहितोक्तेः ॥ अत्रमध्याह्नेपूजावैरात्रौजाग
रणंतथा ॥ परेद्युःप्रातःपायसहोमः ॥ श्रीरामप्रतिमादिकंहेमाद्रौबोध्यं ॥ इयंचमलमासेनका
र्या ॥ सुजप्तमप्यजप्तंस्यान्नोपवासःकृतोभवेत् ॥ नकुर्यान्मलमासेतुमहादानंव्रतानिचेति ॥

Indira Gandhi National
Centre for the Arts

३

माधवीयेसंग्रहवचनात्॥ अर्घ्यमंत्रस्तु॥ दशाननवधार्थाय धर्मसंस्थापनाय च॥ राक्षसानां विना
शाय दैत्यानां निधनाय च॥ परित्राणाय साधूनां जातो रामः स्वयं हरिः॥ गृहाणार्घ्यं मया दत्तं भ्रा
तृभिः सहितोनघेति॥ प्रतिमादानस्तु॥ इमां स्वर्णमयीं राम प्रतिमां समलंकृतां॥ चित्रवस्त्रयुग
च्छन्नां रामोहं राघवाय ते॥ श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः॥ इति दत्त्वा विधानेन दद्याद्दक्षि
णां भुवं॥ ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशय इति॥ चैत्रशुक्लैकादश्यां दोलोत्सवउक्तो ब्रा
ह्मे॥ चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः॥ आंदोलयो वै देवेशः सलक्ष्मीको महोत्सवैरि
ति॥ चैत्रशुक्लद्वादश्यां दमनोत्सवः॥ द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः॥ बौधायना
दिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति रामार्चनचंद्रिकोक्तेः॥ ऊर्जे व्रतं मधौ दोलां श्रावणे तं
तुपूजनं॥ चैत्रे च दमनारोपमकुर्वाणः पतत्यधः॥ इति तत्रैव पाद्मवचनाच्च॥ इदं शुक्रास्तादावपि
कार्यं॥ उपाकर्मोत्सर्जनं च पवित्रदमनार्पणं॥ ईशानस्य बलिं विष्णोः शयनं परिवर्त्तनं॥ कु
र्याच्छुक्रस्य च गुरोर्मौढ्येपीति विनिश्चय इति गोविंदार्णवे वृद्धगार्ग्यवचनात्॥ चैत्रशुक्लच ३

योदश्यामनंगव्रतं॥ तत्र सा पूर्वा ग्राह्या॥ त्रयोदशी तिथिः पूर्वा सितेति दीपिकोक्तेः॥ चैत्रशुक्लचतु
र्दशी पूर्वा॥ निशि भ्रमंति भूतानि शक्तयः शूलभृद्यतः॥ अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवे
दिति ब्रह्मवैवर्त्तात्॥ मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी॥ सा रात्रिव्यापिनी ग्राह्या नान्या
शुक्ला कदाचनेति हेमाद्रौ बौधायनोक्तेश्च॥ चैत्री पौर्णमासी सामान्यनिर्णयात्परैव॥ अत्र विशे
षो निर्णयामृते विष्णुस्मृतौ॥ चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति॥
तथा शास्त्रे॥ मंदे वार्के गुरौ वापि वारेष्वेतेषु चैत्रिकी॥ तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्भवेत्॥
वायवीये॥ संवत्सरकृतार्चायाः साफल्याय खिलान्सुरान्॥ दमनेनार्चयेच्चैत्र्यां विशेषेण सदा
शिवं॥ इयं मन्वादिरपि॥ चैत्रकृष्णत्रयोदश्यां महावारुणीसंज्ञको योगः॥ तदुक्तं वाचस्पतिनिबं
धे॥ शनिवारसमायुक्ता सा महावारुणी स्मृता॥ गंगायां यदि लभ्येत कोटिसूर्यग्रहाधिका॥ शु
भयोगसमायुक्ता शनौ शतभिषायुते॥ महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्॥ चैत्रसि
ते वारुणऋक्षयुक्ता त्रयोदशी सूर्यसुतस्य वारे॥ योगे शुभे सा महती महत्या गंगाजलेर्कग

Indira Gandhi National
Centre for the Arts

४

हकोटितुल्येतित्रिस्थलीसेतौ॥ब्रह्मांडपुराणेपि॥वारुणेनसमायुक्तामधोःकृष्णत्रयोदशी॥गंगा
यांयदिलभ्येतकोटिसूर्यग्रहैःसमेति॥कल्पतरौब्राह्मे॥मधोःकृष्णत्रयोदश्यांशनौशतभिषा
युते॥ख्याताश्रुभेतिमहतीपुण्यदाबुधैःस्मृतेति॥चैत्रकृष्णचतुर्दश्यांविशेषःस्मर्यते॥पृथ्वीचं
द्रोदयेपुलस्त्यः॥चैत्रकृष्णत्रयोदश्यांयःस्नायाच्छिवसंनिधौ॥नप्रेतत्वमवाप्नोतिगंगायांतुविशे
षतः॥अत्रपूर्वाग्राह्याकृष्णपक्षस्यत्वात्॥इतिचैत्रमासनिर्णयः॥छ॥अथवैशाखमासनि
र्णयः॥पृथ्वीचंद्रोदयेविष्णुपाद्मे॥तीर्थेचानुदिनंस्नानंतिलैश्चपितृतर्पणं॥दानंधर्मघटादीनांम
धुसूदनतुष्टिदं॥अथवैशाखस्नानं॥पृथ्वीचंद्रोदयेविष्णुस्मृतिपाद्मयोः॥तुलामकरमेषेषुप्रा
तःस्नानंविधीयते॥हविष्यंब्रह्मचर्यंचमहापातकनाशनं॥इतिसौरमासउक्तः॥अन्यदपिपक्ष
द्वयमुक्तंतत्रैवपाद्मे॥मधुमासस्यशुक्लायामेकादश्यामुपोषितः॥पंचदश्यांतुभोवीरमेषसंक्रम
णेतुवा॥वैशाखस्नाननियमंब्राह्मणानामनुज्ञया॥मधुसूदनमभ्यर्च्यकुर्यात्संकल्पपूर्वकं॥वै
शाखंसकलंमासंमेषसंक्रमणेरवेः॥प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः॥मधुहंतुः ४

प्रसादेनब्राह्मणानामनुग्रहात्॥निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहं॥माधवेमेषगेभानौ
मुरारेमधुसूदन॥प्रातःस्नानेनमेनाथफलदोभवपापहन्॥तीर्थनामापरिज्ञानेतुस्मर्यते
तत्रैव॥यदानज्ञायतेनामतस्यतीर्थस्यभोद्विजाः॥तत्रेदमुच्चारणंकार्यंविष्णुतीर्थमिदंत्वि
ति॥अत्रत्रिकालंतुलस्याविष्णुपूजा॥अश्वत्थमूलेजलदानंचेत्यादितत्रैवोक्तं॥अशक्त
स्तुत्र्यहंस्नायात्॥तदुक्तंतत्रैवपाद्मे॥त्रयोदश्यांचतुर्दश्यांवैशाख्यांचदिनत्रयं॥अपिस
म्यग्विधानेननारीवापुरुषोपिवा॥प्रातःस्नातःसुनियतःसर्वपापैःप्रमुच्यतइति॥यदातु
वैशाखेमलमासोभवतितत्रकाम्यानांतत्रसमाप्तिनिषेधात्मासद्वयस्नानंतन्नियमाश्च
कर्तव्याः॥मासोपवासचांद्रायणादितुमलमासएवसमापयेत्॥तदुक्तंदीपिकायां॥
नियतत्रिंशद्दिनत्वाच्छुभेमास्यारंभःसमापयेतमलिनेसोपवासव्रतमिति॥वैशाख्यांवि
धिवत्स्नात्वाभोजयेद्ब्राह्मणान्दश॥दशारसर्वपापेभ्योमुच्यतेनात्रसंशयः॥वैशाखशु
क्लतृतीयाअक्षय्यतृतीया॥साचपूर्वाह्णव्यापिनीग्राह्या॥दिनद्वयेपितद्व्याप्तौतुपरैवेति

Indira Gandhi National
Centre for the Arts

निर्णयामृतादौ स्थितं॥ एवं युगादिरपि॥ भारते॥ यामन्वाद्या युगाद्याश्च तिथयस्तासु मानवः॥ स्नात्वा हुत्वा च जप्त्वा च दत्त्वानंतफलं लभेदिति॥ श्राद्धं पर्वाह्णव्यापिनी ग्राह्या॥ पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयाः॥ दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिका इति नारदीयोक्तेश्च॥ दिवोदासीये गोभिलः॥ वैशाखस्य तृतीयां पूर्वविद्धां करोति वै॥ हव्यं देवा न गृह्णंति कव्यं च पितरस्तथा॥ इति स्मृत्यर्थसारे गोविंदार्णवादिषु भविष्ये वचनेनेयं पूर्वाह्णव्याप्त्येव दिनद्वये तथात्वेपि परा॥ इमामुपक्रम्य गोभिलेना यकोपेतां पुण्यकोटिप्रदं तिना रदीयोक्तेः॥ उपवासे तु पूर्वा॥ सर्वे ग्रंथितिथ्यौ तीपातो युगमन्वादयस्तथा॥ संमुखा उपवासे स्युर्हीनाः सर्वेति माः स्मृताः॥ इत्यनंतभट्टोदाहृतवचनात्॥ यत्तु निर्णयामृतधृतं॥ अमा श्राद्धमपराह्णिकमुक्त्वा एषमन्वंतरादीनां युगादीनां विनिर्णय इति कालादर्शोक्तेर्वाक्॥ श्राद्धे अपराह्णिक्यैव ग्राह्या॥ दैवशुक्ले इत्यादिवचनं तु विष्णुपूजादिविषयकमिति तस्य गौतमगोभिलादिवचनविरुद्धं॥ कालादर्शोक्तिस्तु कृष्णपक्षयुगादिविषये इति दिक्॥ अविशेषो हेमाद्रौ भविष्ये॥ वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च॥ गंगातोयेन रः स्नात्वा मुच्यते स ५

र्वकिल्बिषैः॥ तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत्॥ यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवानिति॥ अन्नदानविशेषस्तत्रैव भविष्ये॥ इमां प्रक्रम्य॥ उदकं भान्सकरैन कान्सान्नान्सर्वरसैः सह॥ यवगोधूमचणकान्सक्तून्दध्योदनं तथा॥ ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यत इति॥ देवीपुराणे॥ तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूजनं॥ उदकुंभप्रदानेन शिवलोके महीयते॥ तत्र मंत्राः॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः॥ अस्य प्रदानात्तृप्यंतु पितरोपि पितामहाः॥ गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं॥ पितृभ्यः संप्रदास्यामि ह्यक्षय्यमुपतिष्ठतु॥ अत्र च श्राद्धं पिंडरहितमुक्तं॥ अत्र रात्रिभोजने प्रायश्चित्तमुक्तं स्मृतिविधाने॥ रात्रौ भुंक्ते वत्सरे तु मन्वादिषु युगादिषु॥ अभिस्वरं? इमं मंत्रं च जपेद्दशानपातकमिति॥ अपरार्के यमः॥ कृतोपवासाः सलिले ये युगादिदिनेषु तु॥ दानस्नानादि सकलं तेषां लोका महोदया इति॥ वैशाखे मलमासे तु तत्रैव युगादिः कार्या॥ दर्शाहरासुनो लक्षं चैत्रं तु वर्षेपि युगादिषु॥ इति हेमाद्र्युक्तव्यासंग[illegible] परिगणनवचनात्॥ अब्दोदकुंभमन्वादिमहालययुगादिषु इति कालादर्शोक्ता मलमासकृत्येषु परिगणना? द्व महालयशब्देन हेमाद्रयोर्दर्शो विवक्षितेति माधवः॥ स्मृतिचंद्रिकायां तु मासद्वयेपि कर्तव्यमित्युक्तं॥

Indira Gandhi National Centre for the Arts

मन्वादिकं योगादिकं श्राद्धं चापरपाक्षिकं॥ मन्वादिकं तीर्थकं च कुर्यान्मासद्वयेपि चेति॥ अपरपक्षः कृष्ण
पक्षः न तु महालयः तस्य तत्र निषेधात्॥ मदनरत्ने मरीचिः॥ अतिमासं मृताहे च श्राद्धं प्रतिवासरं॥
मन्वादौ च युगादौ च तन्मासोरुभयोरपि॥ प्रतिवत्सरं क्रियमाणं कृष्णादिश्राद्धमिति तत्रैव व्याख्यातं॥
अत्र समुद्रस्नानं महाफलं॥ तदुक्तं पद्मे चंद्रोदये सौरपुराणे॥ युगादौ तु नरः स्नात्वा विधिवल्ल
वणार्णवे॥ गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हि यत्॥ तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवमि
ति॥ अयं निर्णयः॥ सर्वयुगादिषु बोध्यः॥ इयमेव तृतीया परशुरामजयंती सा च प्रदोषव्या
पिनी ग्राह्या॥ तदुक्तं॥ भार्गवार्चनदीपिकायां स्कांदे भविष्ययोः॥ वैशाखस्य सितपक्षे तृती
यायां पुनर्वसौ॥ निशायाः प्रथमे यामे रामाख्यः समये हरिः॥ रेणुकायास्तु योगर्भादवतीर्णो वि
विस्वयमिति॥ दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा॥ अन्यथा पूर्वैव॥ तदुक्तं तत्रैव भविष्ये॥
शुक्ले तृतीया वैशाखे शुद्धोपोष्या दिनद्वये॥ निशायां पूर्वयामे चेदुत्तरान्यत्र पूर्विकेति॥ वैशाखशु
क्लसप्तम्यां गंगोत्पत्तिः॥ तदुक्तं पद्मे चंद्रोदये ब्राह्मे॥ वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी
पुरा॥ क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात्॥ तां तत्र पूजयेद्देवीं गंगां गगनमेखल ६

६ मिति इयं शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या॥ दिनद्वयेपि तद्व्याप्तावेकदेशव्याप्तौ वा पूर्वा॥ युग्मवाक्या
त्॥ वैशाखशुक्लचतुर्दश्यां योगविशेषो हेमाद्रौ॥ पंचाननस्थो गुरुर्भूमिपुत्रो मेषे रविः स्याद्यदि शु
क्लपक्षे॥ मासाभिधानाकरभेण युक्ता तिथिर्व्यतीपात इतीह योगः॥ अस्मिंस्तु गो भूमि[illegible]
[illegible]स्य हिरण्यवस्त्रदानेन सर्वं परिहाय पापं॥ सुरत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्वं लभते मनु
ष्योति॥ पंचाननः सिंहः॥ मासाभिधाना तिथिर्दर्शी॥ करभो हस्तः॥ वैशाखशुक्लचतुर्दश्यां नृ
सिंहजयंती सा च प्रदोषव्यापिनी ग्राह्या॥ तदुक्तं हेमाद्रौ नृसिंहपुराणे॥ वैशाखे शुक्लपक्षे तु च
तुर्दश्यां निशामुखे॥ मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं॥ वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकार
णमिति॥ दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा॥ विषमव्याप्तौ त्वधिकव्याप्तिमती॥ दिनद्वयेप्यव्या
प्तौ पूर्वा॥ पूर्वदिने गौणकालव्याप्तेः सत्वात्॥ परदिने च तदभावात्॥ अस्यां च संकल्परूपव्रतोप
क्रमो मध्याह्न एव कर्तव्यः॥ ततो मध्याह्नवेलायां नद्यादौ विमले जले रस्युपक्रम्य॥ परिधाय ततो वा
सो व्रतकर्म समारभेदिति तत्रैवोक्तेः॥ अस्यामेव योगविशेषेण प्राशस्त्यं तत्र स्मर्यते॥ स्वातिनक्षत्र
योगेन शनिवारे महद्व्रतं॥ सिद्धियोगस्य संयोगे वणिजकरणे तथा॥ पुंसां सौभाग्ययोगेन लभ्यते

Indira Gandhi National
Centre for the Arts

७ चैवयोगतः॥ तथापि॥ एभिर्योगैर्विनापिस्याद्दिनंपापनाशनं॥ तथा॥ सर्वेषामेववर्णानामधिका
रोस्तिमद्व्रते॥ विज्ञायमद्दिनंयस्तुलंघयेत्सापकूल्नरः॥ सयातिनरकंघोरंयावच्चंद्रदिवाकरौ॥ अतए
वेदंनित्यंकाम्यंचेत्याहुः॥ वैशाखपौर्णमास्यांयोगविशेषःस्मर्यते॥ वैशाखीकार्तिकीमाघीतिथयो
तीवपूजिताः॥ स्नानदानविहीनास्तानेयाःपांडुनंदनेति॥ इतिवैशाखनिर्णयः॥ छ अथज्येष्ठः॥
ज्येष्ठशुक्लतृतीयायांरंभाव्रतं॥ तदुक्तंमाधवीयेभविष्ये॥ मंडकुरुषयत्नेनरंभाख्यंव्रतमुत्तमं॥
ज्येष्ठशुक्लतृतीयायांस्नात्वानियमतत्परेति॥ सापूर्वविद्धाग्राह्या॥ बहुत्तपातथारंभासावित्री
वटपैतृकी॥ कृष्णाष्टमीचभूताचकर्त्तव्यासंमुखीतिथिरितिस्कांदोक्तेः॥ ज्येष्ठशुक्लदश
मीदशहरा॥ तदुक्तंहेमाद्रौब्राह्मे॥ ज्येष्ठेमासिसितेपक्षेदशमीहस्तसंयुता॥ हरतेदशपापा
नितस्माद्दशहरास्मृते॥ति॥ स्कांदेतुदशयोगाश्चोक्ताः॥ यथाज्येष्ठेमासिसितेपक्षेदश
म्यांबुधहस्तयोः॥ गरानंदव्यतीपातकन्याचंद्रवृषेरवौ॥ दशयोगेनरःस्नात्वासर्वपापैः
प्रमुच्यतेइति॥ बुधभौमयोर्विकल्पः॥ इयंचयत्रयोगबाहुल्यंसाग्राह्या॥ योगाधिक्येफ ७
लाधिक्यात्॥ ज्येष्ठेमलमासेस्मितितत्रैवदशहराकार्यानतुशुद्धेदशहरासुनोऽकृषेइत्यु

क्तेः॥ स्कांदे॥ यांकांचित्सरितंप्राप्यदद्यादर्घ्यंतिलोदकं॥ मुच्यतेदशभिःपापैःसमहापातकैरपीति॥
अत्रविशेषःकाशीखंडेस्मर्यते॥ ज्येष्ठेमासिसितेपक्षेप्राप्यप्रतिपदंतिथिं॥ दशाश्वमेधिके
स्नात्वामुच्यतेसर्वपातकैः॥ एवंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः॥ आऽशुक्लपक्षदशमी
प्रतिजन्माघमुत्सृजेत्॥ तथा॥ लिंगंदशाश्वमेधेशंदृष्ट्वादशहरातिथौ॥ दशजन्मार्जितैःपापैः
स्त्यज्यतेनात्रसंशयः॥ ज्येष्ठशुक्लैकादशीनिर्जला॥ तत्रनिर्जलमुपोष्यविप्रेभ्योजलकुंभान्द
द्यात्॥ इतिनिर्णयामृतेउक्तं॥ ज्येष्ठीपौर्णमास्यांसावित्रीव्रतं॥ तदुक्तंस्कंदभविष्ययोः॥ ज्येष्ठ
मासिसितेपक्षेद्वादश्यांरजनीमुखेइत्युपक्रम्य॥ व्रतंत्रिरात्रमुद्दिश्यदिवारात्रिस्थिराभवे
त्॥ इत्युक्त्वातेउपसंहृतं॥ ज्येष्ठेमासिसितेपक्षेपूर्णिमास्यांतथाव्रतं॥ चीर्णंपुरामहाभक्त्या
कथितंतेमहाव्रतंमघेतिदाक्षिणात्यास्त्वेस्यमेवाचरंति॥ पश्चात्सादयस्तु अमावास्यायामेवाच
रंति॥ तथोक्तंनिर्णयामृतेभविष्ये॥ अमायांचतथाज्येष्ठेवटमूलेमहासती॥ त्रिरात्रोपो
षितानारीविधिनानेनपूजयेत्॥ अशक्तौतुत्रयोदश्यांनक्तंकुर्याज्जितेंद्रिया॥ अयाचितं
चतुर्दश्याममायांसमुपोषणमिति॥ हेमाद्र्यादिभिस्तुभाद्रपदपूर्णिमायामुक्तं॥ तत्तुनेहानी

२ माचरंति॥ अत्र पूर्णिमाऽमावास्ये पूर्वविद्धे ग्राह्ये॥ भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा ॥
॥ वर्जयित्वासुरश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात्॥ यत्तु ब्रह्मादशनाडिका चतुर्दशी तदाप
रेव॥ पूर्वविद्धेव सावित्रीव्रते पंचदशी तिथिः॥ नागेऽष्टादशनाडीस्तु तस्य स्यात्तत्र परेऽहनीति मा
धवोक्तेः॥ अत्र पूर्णिमानुरोधेनैव यथा त्रिरात्रिसंपत्तिर्भवति तथा त्रयोदश्यादि ग्राह्यं॥ त
स्याः प्राधान्यात्॥ ज्येष्ठमासे तिलान्दद्यात्पौर्णमास्यां विशेषतः॥ अश्वमेधस्य यत्पुण्यं तत्प्रा
प्नोति न संशयः॥ पद्मविष्णुः॥ ज्येष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो नराधि
पत्यं प्राप्नोतीति॥ इयं मन्वादिरपि॥ साप्यपराह्णव्यापिनी ग्राह्येत्युक्तं॥ तथाऽपरार्के वामनपुराणे॥ उक्तं
एवं भोः बुधानं च तालवृंतं सचंदनं॥ त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि द्विजे॥ इति ज्येष्ठमा
सनिर्णयः॥ ७॥ अथाषाढः॥ ७॥ आषाढशुक्लदशमी पूर्णिमासी च मन्वादिः॥ पूर्वाह्णव्यापिनी
त्युक्तं॥ आषाढशुक्लद्वादश्यामनुराधायोगरहितायां पारणं कुर्यात्॥ तथा च हेमाद्रौ भविष्ये॥
आभाकासितपक्षेषु मैत्रश्रवणरेवती॥ संगमे न हि भोक्तव्यं द्वादशी द्वादशीर्हरेत्॥ आषाढभाद्र २
पदकार्तिकशुक्लद्वादशीषु अनुराधाश्रवणरेवतीयोगे न पारणं कुर्यादित्यर्थः॥ अत्र विशेषो वि

ष्णुधर्मोत्तरे॥ मैत्राद्यपादे स्वपितीह विष्णुः पौष्णस्य पादे प्रतिबोधमेति॥ श्रुतेश्च मध्ये परिवर्तमेति सुप्ति
प्रबोधे परिवर्तनं नमेव वर्ज्यं॥ आषाढशुक्लद्वादश्यां वा विष्णुशयनोत्सवः कर्तव्यः॥ उक्तं च हेमाद्रौ ब्राह्मे॥
एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः॥ भुजंगशयने शेते क्षीरार्णवजले सदेति॥ हेमाद्रौ भवि
ष्ये॥ द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवः॥ तत्रैव वाराहे॥ द्वादश्यां संधिवेलायां नक्षत्राणा
मसंभवे॥ आभाकासितपक्षेषु शयनावर्तनादिकमिति॥ अत्र द्वादश्यामिति पारणाहमात्रं वि
वक्षितं॥ पारणाहे पूर्वरात्रे घंटादीन्वादयन्मुहुरिति रामार्चनचंद्रिकोक्तेः॥ निशि स्वापो दिवोत्था
नं संध्यायां परिवर्तनं॥ पादयोगो यदा न स्यात्पक्षेणापि तदा भवेत्॥ द्वादश्यामृक्षसंयोगो पाद
योगो न कारणमिति॥ वाराहात्॥ इदं च मलमासेन कार्यं॥ ईशानस्य वह्नि विष्णोः शयनं परिवर्त
नमिति कालादर्शनिषेधात्॥ अत्र चातुर्मास्यव्रतारंभो दृश्यते॥ आषाढस्य सितपक्षे एकादश्या
मुपोषितः॥ चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः॥ अस्यानियतत्वं तत्रोक्तं॥ वार्षिकांश्चतुरो
मासान्वाहयेत्केनचिन्नरः॥ व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवं॥ असंभवे तुलार्के तु कर्तव्यं
त स्यपतरिति॥ अस्यारंभः॥ शुक्लस्यादावपि कार्यः॥ न शेशवं न मोढ्यं च शुक्रगुर्वो नैवातिथेः॥ खंडवं
स्या।

Indira Gandhi National
Centre for the Arts

६

इदं च द्वितीयाद्यारंभविषयं॥ तथा॥ आषाढ्यां च म
चा० चिंतयेद्यदौ तु मासस्य विधौ नर इति वृद्धगार्ग्योक्तेः॥ इदं च द्वितीयाद्यारंभविषयं॥ व्रतमेतन्नरः कृत्वा मुच्य
ध्ये द्वितीयाद्यारंभो भवत्येव॥ अशुचिर्वापि यदि स्त्री यदि वा पुमान्॥ व्रतमेतन्नरः कृत्वा मुच्य
ते सर्वपातकैरिति भार्गवार्चनदीपिकायां स्कांदोक्तेः॥ आरब्धस्य सूतकं न स्यादनारब्धे तु सूत
कमिति॥ विष्णुवचनात्॥ यत्तु॥ असंक्रांतं तथा मासं दैवे पित्र्ये च कर्मणि॥ मलमासं मध्ये चै
व वर्जयन्मतिमान्नरः॥ इति हेमाद्रौ चातुर्मास्यप्रकरणे भविष्यवचनं॥ तत्प्रथमारंभविषयं॥ न तु प्रति
वर्षं चातुर्मास्यव्रतप्रयोगाणां भिन्नत्वात्॥ आषाढ्यादिपाते द्वितीयप्रयोगोपि कथं स्यादिति वाच्यं॥ प्र
तिवर्षं च यः कुर्यादेवं वै संस्मरन्हरिं॥ इहांते तेति प्रदीप्तेन विमानेनार्कवर्चसा॥ मोदते विष्णुलो
के सो यावदाहूतसंप्लवमिति हेमाद्रौ भविष्यवचने न प्रयोगैक्यावगतेः॥ व्रतग्रहणप्रकारस्तु हेमा
द्रौ भविष्ये॥ एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः॥ प्रभाषेताग्रतो विष्णोः कृतांजलिपुटः स्त
था॥ चतुरो वार्षिकान्मासान्देवस्योत्थापनं विधि॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत॥ इ
दं व्रतं मया देव गृहीतं पुरतस्तव॥ निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव॥ गृहीतेऽस्मिन्व्रते
देव पंचत्वं यदि मे भवेत्॥ तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दनेति॥ भविष्ये॥ श्रावणे वर्जे ६

येच्छाकं दधि भाद्रपदे तथा॥ दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेदिति॥ स्कांदे॥ माषमुद्गमसूराश्च
चणकाश्च कुलित्थकाः॥ निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतमिति स्कांदे॥ लल्लातुरीयेतानि
नित्यानि चतुराश्रमवासिनां॥ प्रथमे मासि कर्तव्यं नित्यं शाकव्रतं नरैः॥ द्वितीये मासि कर्तव्यं द
धिव्रतमनुत्तमं॥ पयोव्रतं तृतीये तु चतुर्थेपि पुनि धामय॥ द्विदलं बहुबीजं च वृंताकं चैव वर्ज
येत्॥ व्रतान्येतानि विप्रेंद्र निसान्याहुर्मनीषिणः॥ तथा॥ जंबीरं राजमाषांश्च कमूलकं करं
मूलकं॥ कूष्मांडं चेक्षुदंडं च चातुर्मास्ये त्यजेद्बुधः॥ तथा॥ विशेषाद्बदरी आधात्री कूष्मां
डं चिंचिणी त्यजेत्॥ जीर्णं धात्रीफलं ग्राह्यं कपित्थं चिंचिकायुक्तं च नमिति॥ स्कांदे॥ वार्षिकांश्च
तुरो मासान्प्रसुप्ते च जनार्दने॥ मंचखट्वादिशयनं वर्जयेद्भक्तिमान्नरः॥ अनंतोवर्जयेन्मासं
मधुपरौदनं॥ पटोलं मूलकं चैव वृंताकं न च भक्षयेत्॥ इत्यादि पुनः बहु द्वासुरूढः॥ मूल
पत्रकरीराग्रफलकांडाधिरूढकाः॥ त्वक्पुष्पं कवचं चेति शाकं दशविधं स्मृतमिति स्कांदे॥ अधि
रूढं अंकुरः॥ आचारप्रदीपे॥ वृंताकं च कलिंगं च बिल्वोदुंबरभिःसटाः॥ उदरे यस्य जीर्यंति तत
स्य दूरतरो हरिः॥ भिःसटेति ह्रस्वपाठे दग्धान्नं॥ भीसटेति दीर्घपाठे तु भीः सटं श्लेष्मांतकमिति प्र

Indira Gandhi National
Centre for the Arts

१०
न्वंतरिनिघंटः॥ निष्पावा राजमाषाश्च मसूरं संधितानि च॥ वृंताकं च कलिंगं च सुप्ते देवे विवर्जयेत्॥
संधितानि लवणशाकादीनि॥ अत्रैव तप्तमुद्राधारणमुक्तं॥ रामार्चनचंद्रिकायां पाद्मे चंद्रोदये तधु
द्रादिविषयमिति निर्णीतं॥ आषाढे पौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये॥ आषाढपौर्णमी
स्यां वै संध्याकाल उपस्थिते॥ संकल्पयेन्मासमेकं श्रावणे प्रसहं मुहं॥ स्नानं करिष्ये नियता ब्र
ह्मचर्ये स्थिता सती॥ भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति॥ अस्य नक्तव्रतत्वात्सा
याह्नव्यापिनी ग्राह्या॥ अत्रैव व्यासपूजोक्ता॥ तत्र मध्याह्नव्यापिनी ग्राह्या॥ दिनद्वये पितव्याप्तौ
तु परे वेति संन्यासपद्धतौ॥ इत्याषाढनिर्णयः॥ अथ श्रावणः॥ श्रावणशुक्ले तृतीयाम
धुश्रवाख्या गुर्जरदेशेषु प्रसिद्धा॥ सा परयुता ग्राह्येति दिवोदासीये॥ श्रावणशुक्ले चतुर्थी दू
र्वेयुता मातृविद्धा गणेश्वर इति वचनात्॥ श्रावणशुक्ले पंचमी नागपूजायां चमत्कारचिंता
मणौ परा॥ पंचमी नागपूजायां कार्या षष्ठीसमन्विता॥ तस्यां तु तुषिता नागा इतरा सचतु
र्थिके॥ तिमदनरत्नाद्यप्येवं॥ अत्र विशेषो हेमाद्रौ भविष्ये॥ श्रावणे मासि पंचम्यां शुक्लपक्षे १०
नराधिप॥ द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः॥ पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः

कुशैः॥ गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः॥ ये तस्यां पूजयंती नागान् भक्तिपुरःसराः॥
न तेषां सर्पतो वीर भयं भवति कुत्रचिदिति॥ श्रावणशुक्लद्वादश्यां दधिव्रतमुक्तं॥ तत्र तक्रादीन
निषेधः॥ तत्र दधिप्रत्यवहाराभावात्॥ अत्रैव द्वादश्यां विदर्भोः पवित्रारोपणमुक्तं॥ हेमाद्रौ विष्णु
रहस्ये॥ श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे॥ द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतं॥ द्वादश्यां
श्रावणे वापि पंचम्यामथवा द्विज॥ आनुकूल्येषु कर्तव्यं पंचदश्यामथापि वा॥ तथा शैवे तु त
त्रैव कालोत्तरखंडे॥ आषाढांते चतुर्दश्यां नभस्य नभसोस्तथा॥ अष्टम्यां च चतुर्दश्यां पक्ष
योरुभयोरपि॥ अधिवासनं तु दीपिकायां॥ गोदोहांतरिते काले एवं दुर्वाधिवासनमिति॥ गौ
णकालो रामार्चनदीपिकायां॥ पवित्रारोपणं विघ्नाच्छ्रावणे यदि नो भवेत्॥ कार्त्तिकावधिशु
क्लार्के कर्तव्यमिति नारदः॥ अर्कद्वादश्यां॥ हेमरूप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः॥
कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्तितैः शुभैः॥ कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोध
येत्॥ तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः॥ सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं

Indira Gandhi National
Centre for the Arts

स्मृतं॥ साष्टी तिनाष्टौ तैकेनकनिष्ठं तत्समाचरेत्॥ साधारणपवित्राणि त्रिभिः सूत्रैः समाचरे
त्॥ उत्तमं तु शतग्रंथि पंचाशन्मध्यमं दशाष्टा विसेके मुनयो विदुः॥ शिवपवित्रं तु तत्रैव शिवागमे॥
एकादशभिर्वा सूत्रैस्त्रिशताष्टोत्तरया॥ पंचाशता च कर्तव्यं तु स्यग्रंथ्यंतरांकं॥ द्वादशांगुल ३
गुणमानानि व्यासा द्दशांगुलानि च॥ लिंगविस्तारमानानि चतुरंगुलकानि चेति एतच्च नि
त्यं॥ न करोति विधानेन पवित्रारोपणं तु यः॥ तस्य सांवत्सरीं पूजां निष्फलां मुनिसत्तम॥ संस्का
मुक्तिसमायुक्ते नरे विष्णुपरायणे॥ वर्षे वर्षे प्रकर्तव्यं पवित्रारोपणं हरे रित्तिरिति॥ तत्रै
वोक्तेः॥ श्रावणशुक्लचतुर्दशी सर्वयुताग्राह्या॥ चैत्रशुक्लचतुर्दशी वत्॥ अथोपाकर्म॥
तच्च कृते चे श्रवणे कार्यं॥ दिनद्वये श्रवणे तु उत्तरं ग्राह्यं॥ बह्वृचकात्यायनौ॥ अर्द्धरात्राद
धस्तात्संक्रांतिर्ग्रहणं भवेत्॥ उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत्॥ इदं च कर्कटस्थे
भानौ निषिद्धं॥ स च निषेधो नर्मदोत्तरभागविषय इति माधवीये पारिजातादौ स्थितं॥ न
र्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके॥ कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिण इति वचना ११

त्॥ केचित्सामगानां सिंहस्थे रवावुपाकर्मविधानात्तत्रैवास्योपसंहारः॥ चतुर्थीकरणवाक्य
स्यानैयेपर्यंतेति वदंति॥ एतच्च शुक्रास्तादावपि कार्यं॥ प्रथमारंभस्तु तत्र न भवति॥ अधिमासे न
भवत्येव॥ सामगानां त्वधिमासे भवत्येव॥ एतच्च सामगेतरपराह्णे कार्यं॥ इतरैः पूर्वाह्णे॥ इदं च
याजुषाः पर्वणि कुर्युः॥ पर्वद्वैधे तु आपस्तंबैरुत्तरं ग्राह्यं॥ इतरैः पूर्वं॥ इदं चोपासने ग्नौ कर्त
व्यं॥ अध्यायोरन्वारब्ध इति पक्षे तु लौकिकाग्नौ॥ अत्राश्वलायनेन श्रवणाकर्मोक्तेः॥ श्राव
ण्यां पौर्णमास्यां श्रवणाकर्मेति॥ तत्रास्तमयव्यापिनी ग्राह्या॥ अस्तमिते स्थालीपाकं श्रपयि
त्वेति सूत्रात्॥ श्रावणकृष्णचतुर्थी संकष्टचतुर्थी सा चंद्रोदयव्यापिनी ग्राह्या॥ तदुक्तं॥
स्कांदे॥ श्रावणे बहुले पक्षे चतुर्थ्यां च विधूदये॥ तस्मिन् दिने व्रतं कार्यं संकष्टाख्यं सुरेश्व
री॥ ति॥ दिनद्वये सत्त्वे पूर्वैव॥ मातृविद्धा गणेश्वर इति वचनात्॥ अनंतसागरे नारदः॥ नद
रे सिंहगते सूर्ये पयस्य गोः संप्रसूयते॥ मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः॥ तत्र शांतिं प्रव
क्ष्यामि येन संपद्यते शुभं॥ प्रसूतां तां वत्सगणादेव तां गां विप्राय दापयेत्॥ ततो होमं प्रकुर्वीत
घृताक्तै राजसर्षपैः॥ आहुतीनां घृताक्तानामयुतं जुहुयात्ततः॥ व्याहृतिश्चायं होमः॥ सो

Indira Gandhi National
Centre for the Arts

१२ पवासप्रयत्नेनदद्यादिद्वायदक्षिणामिति॥ अथर्ववेदिनो गृह्यपरिशिष्टे॥ माघेबुधेचमहिषीश्रा
वणेचवडवादिवा॥ सिंहेगावः प्रसूयंते स्वामिनोमृत्युदाकाऽइति॥ अत्रतदुक्तामंतरंग्यांशांतिः
कार्या॥ श्रवणादिमासचतुष्टयेकृष्णपक्षद्वितीयासु अशून्यशयनव्रतं॥ अत्र चंद्रोदयव्या
पिनीग्राह्या॥ दिनद्वयेसत्वे तुपरेतिनिर्णयामृते॥ नभःकृष्णतृतीयाकज्जलीसंज्ञापरे॥ दिवोदा
सीये॥ ननौ बहुलचतुर्थी बहुलाख्यामध्यदेशे प्रसिद्धा सायाह्नव्यापिनीग्राह्या॥ दिनद्वयेतथा
त्वेतुपूर्वा॥ अथगोपूजायवान्नाशनंचकार्यमिति दिवोदासीये॥ अथजन्माष्टमी॥ सातु आमां
तमासपक्षे श्रावणकृष्णाष्टमी पूर्णिमांतमासपक्षे भाद्रपदकृष्णजन्माष्टमीव्रतं चनित्यं॥ ज
यंतीव्रतंनुनित्यंकाम्यंच॥ यस्मिन्वर्षे जयंताख्योयोगो जन्माष्टमीतदा॥ अंतर्गताजयंत्याख्या
हृष्ययोगः प्रशस्यत इति॥ माधवः॥ हेमाद्रिस्तुजयंतीव्रतंभिन्नं॥ जयंतीशब्दो हि रात्रिविशेषवच १२
नः॥ अभिजिन्नामनक्षत्रंजयंतीनामशर्वरी॥ मुहूर्तोविजयोनामतत्रजातोजनार्दनःऽइतिब्रह्मांड
वचनात्॥ तेनतद्युक्तरोहिण्यागौणएवकर्मकालस्त्वनिशीथं॥ समयोगेतुरोहिण्यानिशीथेराज

सत्तम॥ समजायंतगोविंदबालरूपीचतुर्भुजः॥ तस्मात्तंपूजयेत्तत्रेतिवह्निपुराणात्॥ एवंचरोहि
णीयोगाद्वेप्यर्द्धरात्रिव्यापिन्यष्टमीग्राह्या॥ परदिनेसन्नपिनक्षत्रयोगोऽकिंचित्करः॥ बुधवा
सरादिवत्॥ यत्तुस्कांदे॥ उदयेचाष्टमीकांचिन्नवमीसकलायदि॥ लभ्यतेबुधसंयुक्ता प्राजाप
त॥ त्यर्क्षसंयुता॥ अपिवर्षशतेनापिलभ्यतेवानलभ्यतेइति॥ तद्दानादिविषयं॥ उपवासोऽश्रवणात॥
उदयेचंद्रोदयेइतिव्याख्येयं॥ अर्द्धरात्रेतुयोगोयंतारापत्युदयेसतीति तुविस्मुधर्मोक्तेः॥ अत्रकेचि
नू॥ उदयव्यापिनीग्राह्याकुलेतिथिरूपोषणे॥ निंबार्को भगवान्येषांवांछितार्थफलप्रदः॥ इति
हेमाद्रौ॥ निंबसप्तमीव्रतेभविष्येवचनं॥ निंबादित्यसोप्रदायिनामौदयिक्येवेयं॥ एवंशिवरात्र्यादि
कमपीत्याहुः॥ तद्वहवोनाद्रियंते प्रकरणे निंबसप्तमीव्रतेनियंत्रणनस्यान्यगमनायोगादिति दिक्॥
श्रीकृष्णदेवकीवसुदेवयशोदानंदादिप्रतिमानिर्माणतत्पूजनादिप्रकारादिकंव्रतंहेमाद्रौप्रसिद्धं॥
नत्वेवं भविष्ये॥ चंद्रार्घ्यमंत्रो क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव॥ गृहाणार्घ्यंमयादत्तंरोहि
ण्यासहितोमम॥ ज्योत्स्नापतेनमस्तुभ्यंनमस्तेज्योतिषांपते॥ नमस्तेरोहिणीकांत अर्घ्यंनःप्रतिगृ
ह्यतां॥ जातःकंसवधार्थायभूभारोत्तारणायच॥ गृहाणार्घ्यंमयादत्तंदेवक्यासहितोहरे॥

Indira Gandhi National
Centre for the Arts

१२ श्रावणामावास्यायां कुशग्रहणमुक्तं ॥ हेमाद्रौ हारीतेन ॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो
मतः ॥ इति मरीचिवाक्यमुदाहृतं ॥ इदं च पूर्णिमाभिप्रायमिति हारीतेन सहैकवाक्यत्वे वक्ते चि
तु मरीचिवाक्ये पिदर्शांतमासपक्षमाश्रित्य महालयांतर्गतपक्षे कुशग्रहणमाहुरिति ॥ इति श्रा
वणमासनिर्णयः ॥ छ ॥ अथ भाद्रपदमासनिर्णयः ॥ भाद्रपदशुक्लतृतीयायां हरितालिका
व्रतं तत्र परा ग्राह्या ॥ मुहूर्तमात्रसत्त्वेपि दिने गौरीव्रतं परे इति माधवोक्तेः ॥ हरितालिका त्वपुर
स्कारेणापि पिविद्धग्रहवचनानां दैवोदासीयेउदाहृतत्वात् ॥ भाद्रपदशुक्लचतुर्थी सा मध्याह्न
व्यापिनी पूर्वा ग्राह्या ॥ पूर्वदिने मध्याह्नव्याप्त्यभावे परा ॥ तदुक्तं माधवीये बृहस्पतिवचनं ॥ च
तुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥ मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनि ॥ दिनद्वये
मध्याह्नव्याप्त्यभावे पूर्वा ॥ मातृविद्धा गरीयसी इत्युक्तेः ॥ इयं रविभौमयोरतिप्रशस्ता ॥ भाद्र
शुक्लचतुर्थ्यां सोमेनांगारकेण वा युता ॥ महती सा च विघ्नेशमर्चित्वेष्टं लभेन्नर इति निर्णयामृते वा
राहोक्तेः ॥ अत्र चंद्रदर्शनं निषिद्धं ॥ तथा चापरार्के मार्कंडेयः ॥ सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चंद्र १३

दर्शनं ॥ मिथ्याभिदूषणं तेकुर्यात्तस्मात्पश्येन्न तं सदा ॥ तद्दोषशांतये सिंहः प्रसेनमिति वै पठेत् ॥ श्लोकस्तु
विष्णुपुराणे ॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः ॥ भाद्र
पदशुक्लपंचमी ऋषिपंचमी सा हेमाद्रिमते परा ॥ सितांबरयुता स्यात्पंचमीति दीपिकोक्तेः ॥ माधव
मते तु पूर्वा सर्वत्र पंचमीत्युक्तेः ॥ अत्र सूर्ये निर्णयामृते स्पष्टं ॥ भाद्रशुक्लाष्टमी दूर्वाष्टमी सा पूर्वा ॥
शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत् ॥ दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयते ॥ इति पुराण
समुच्चयोक्तेः ॥ यत्तु ॥ मुहूर्ते रोहिणीष्वष्ट्याः पूर्वा वा यदि वा परा ॥ दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं तु वर्ज
येदिति ॥ रोहिणो नवमो मुहूर्तः ॥ उत्तराख्यातैवात्र वचनं तत्स्वर्वं दिने ज्येष्ठादियोगे द्रष्टव्यं ॥ दूर्वाष्टमी
सदा सा ज्या ज्येष्ठामूलर्क्षसंयुता ॥ तथा ॥ इंद्रक्षेत्र जिता हर्बीहंत्यपत्यानि नान्यथा ॥ नक्षत्रेरायुहरा
मूले तस्मात्तां परिवर्जयेदिति निषेधादिहेमाद्रौ स्थितं ॥ इदं चागस्त्योदये कन्यार्के न कार्यं ॥ शुक्ला
भाद्रपदे मासि दूर्वासंज्ञा तु याष्टमी ॥ सिंहार्के एव कर्तव्या न कन्यार्के कदाचन ॥ सिंहस्थे सोत्तमा स्त
येनुदिते मुनिसत्तमेति मदनरत्ने स्कांदोक्तेः ॥ अगस्त्य उदिते नातः पूजयेदम्लोद्भवां ॥ वैधव्यं पु

Indira Gandhi National
Centre for the Arts

त्रशोकं च दशवर्षाणि पंच चेति तत्रैव देवोक्तेः ॥ इदं च व्रतं स्त्रीणामनिशं ॥ यानपूजयते दूर्वां मोहा
दिह यथाविधि ॥ त्रीणि जन्मानि वैधव्यं लभते ॥ नात्र संशय इति पुराणसमुच्चयात् ॥ यदा ज्ये
ष्ठादिकं विनाष्टमी न लभ्यते तदा तत्रैवोक्तेः ॥ कर्तव्या चैकभक्तेन ज्येष्ठामूलं यदा भवेत् ॥
दूर्वामभ्यर्चयेद्भक्त्या नवंध्यं दिवसं नयेत् ॥ अत्र विधिर्मदनरत्ने भविष्ये ॥ शुभ्रे देशे प्रजाता
यां दूर्वायां ब्राह्मणोत्तम ॥ स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत् ॥ तथ्य सतो [illegible] जम्बे
ष भर्घ्यं दद्यात्तिलोचने ॥ दूर्वाशमीभ्यां विधिवत्संपूज्य कुर्यान्वितां ॥ तत्र मंत्रः ॥ त्वं दूर्वेऽमृत
जन्मासि वंदितासि सुरोत्तमैः ॥ सौभाग्यं संततिं कृत्वा देहि सर्वकार्यकरी भव ॥ यथा शाखाप्रशा
खाभिर्विस्तृतासि महीतले ॥ तथा ममापि संतानं देहि त्वमजरामरमिति ॥ अत्रानग्निपक्वं भ
क्षयेत् ॥ अनग्निपक्वमश्नीयाद्दधिफलं तथा ॥ अक्षारलवणं [illegible] मश्नीयान्मधुनान्वितं
मिति भविष्ये ॥ अथ ज्येष्ठापूजा स्कांदे ॥ मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसं
युते ॥ यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति ॥ इयं ज्येष्ठायोगवशेन पूर्वा परा १४

वा ग्राह्या ॥ दिनद्वये योगे परा पूर्वैव अयोगे पूर्वैव ॥ नवम्या सह कार्या स्यादष्टमी नात्र संशयः ॥ मासि भा
द्रपदे [illegible] पक्षे शुक्ले ज्येष्ठर्क्षसंयुता ॥ रात्रिर्यस्मिन्दिने तस्मिन् ज्येष्ठायाः परिपूजनमिति तत्रैवोक्तेः ॥ पू
र्वस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणु ॥ तस्मिन्हविष्यं पूजा च न्यूना चेत्सर्ववासर इति ॥ इदं च केवलतिथौ
केवलनक्षत्रे कोत्तमास्ये ॥ प्रसादिके तथामुक्ते तत्र ज्येष्ठादैवतं प्रति ॥ ज्येष्ठाव्रतं पञ्चविहितं केवलेति यावेवा
चरेदाद्यद्वितीयं केवलर्क्षं इति दाक्षिणात्यास्तु कृष्णे एव कुर्वंति ॥ तथा ॥ मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूज
येत् ॥ मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति ॥ तत्र मंत्रः ॥ ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः ॥ शर्वायै ते नम
स्तुभ्यं शांकर्यै ते नमो नमः ॥ ज्येष्ठे श्रेष्ठे तपोनिष्ठे धर्मिष्ठे सत्यवादिनी ॥ समुद्रमथने देवि ज्येष्ठादेवि नमोस्तु ते ॥
भाद्रशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् ॥ आभाकाक्षितपक्षेपि तिथिर्द्वादशीसहत वचनात् ॥ उ
ष्येकादशी मोहात् स्तातां श्रवणे यदि ॥ करोति हंति तत्पुण्यं द्वादश द्वादशीर्भवाम्ति तत्रैव स्कांदात् ॥ प्रस्वपिति
प्रसवः मार्कंडेयः ॥ विशेषेण महीपाल श्रवणं परिवर्द्धते ॥ तिथिक्षयेन कर्तव्यं द्वादशीं लंघयेन्न हि ॥ एतच्च श्रव
णनक्षत्रे त्रेधा विभज्य मध्यमविंशतिघटिकायोगं स्तत्का पारणं कार्यं ॥ तदुक्तं विष्णुधर्मे ॥ श्रुतेश्च मध्ये परिवर्तमेति

Indira Gandhi National
Centre for the Arts

सुप्तप्रबोधपरिवर्त्तनमेव। वर्ज्यमिति। केचित्तु चतुर्द्धा विभज्य मध्यमपादं वर्ज्यमित्याहुः। अत्रैव विष्णुपदे त-
था। शक्रमुत्थापयेद्राजा विष्णुं श्रवणरेवती॥ इयमेव श्रवणद्वादशी। तत्रैकादश्यां द्वादश्यां श्रवणयोगे सैवो-
पोष्या। विष्णुशृंखलाख्ययोगात्। एकादश्यां श्रवणयोगाभावेपि तद्दिनमध्ये देन श्रवणस्पृष्टद्वादशी-
योगादेव विष्णुशृंखलाख्यमिति हेमाद्रिमतं निर्णीतामृते च श्रवणस्यैकादशीभ्यां द्वादशीभ्यां योग एव वि-
ष्णुशृंखलो नान्यथेति। यद्दिनीयानंतरं सूर्योदयावधि कलामात्रमपि श्रवणर्क्षं तदा पूर्वैव। दिवोदासी-
येतु रात्रेः प्रथमयामे श्रवणयोगे पूर्वा। अन्यथोत्तरेत्युक्तं। इयं बुधवारेति प्रशस्ता। यदा त्वेकादश्येव श्र-
वणयुता न द्वादशी तदैकादश्यामेव व्रतं भवति। यदा द्वादशी ऋक्षसंयुता तदा शक्तेनोभयत्रोपवसेत्। अश-
क्तस्तु एकादश्यां गौणोपवासं कृत्वा द्वादशीमुपवसेत्। इदं च काम्यव्रतमिति गौडाः। नित्यमिति दाक्षिणात्याः।
पारणं तु भयांते अन्यतरांते वा कुर्यात्। भाद्रपदे श्रवणस्यैकादश्यां मध्याह्ने वामनावतारः। तत्र वामनपूजा प्र-
तिमादानादिकं व्रतं हेमाद्रौ स्थितं। श्रवणयुतशुद्धैकादश्या अलाभे तु दशमीविद्धापि श्रवणयुता ग्राह्या। तथा
च मदनरत्ने वह्निपुराणे। दशम्येकादशी यत्र सा नोपोष्या भवेन्नृप। श्रवणेन तु संयुक्ता सोपोष्या सर्वका- १५

महेति। अस्यां द्वादश्यां दुग्धव्रतसंकल्पः। दुग्धव्रते तु पायसादिकं वर्ज्यं। दधितक्रादयस्तद्विकारास्तु ग्राह्या एव। नन्वेवं
धिन्यादिक्षीरनिषेधेपि दध्यादिग्राह्यं स्यादि[illegible]मिति चेत्। तत्र वाचनिकनिषेधसत्त्वात्। तदाहापरार्के ब्राह्मः। क्षीरा-
दि पान्यभक्ष्याणि तद्विकारांश्च नेबुधः। समस्तं व्रतं कुर्यात्प्रयत्नेन समाहित इति। व्रतं गोमूत्रयावकं। भाद्रपदचतुर्दश्या-
मनंतव्रतं। तत्र द्विमुहूर्त्ताप्यौदयिकी ग्राह्येत्युक्तमिति माधवः। दिवोदासीये तु मध्याह्ने न्यूनेपि वेलायामिति कथायाः श्र-
वणात्। मध्याह्नव्यापिनी ग्राह्येत्युक्तं। सिंहगे सूर्ये एकविंशतिदिनोपरि अगस्त्योदयः। उदेति याम्यां हरिसंक्रमाद्वै-
रेकाधिकैर्विंशतिमेत्यगस्त्य इति दिवोदासीये हेमाद्रिवचनात्। तत्र काशमयीं प्रतिमां कृत्वा तत्पूजनादिकं अगस्त्यः स्व-
नमानस्य चार्घ्यं च दद्यादित्यादि व्रतं हेमाद्रौ स्पष्टं। भाद्रपदपौर्णमास्यां प्रपितामहादीनुद्दिश्य श्राद्धं कार्यं। तदु-
क्तं हेमाद्रौ ब्राह्मे मार्कण्डेयः। नांदीमुखानां प्रत्यब्दं कन्याराशिगते रवौ। पौर्णमास्यां तु कर्तव्यं वाराहवचनं यथेति। नांदी-
मुखत्वे चोक्तं तत्रैव। पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः॥ तेभ्यः पूर्वतरा ये
च प्रजावंतः सुखैधिताः। ते तु नांदीमुखा नांदी समृद्धिरिति कथ्यते। एतच्च नित्यं प्रत्यब्दमित्युक्तेः। अत्र मातामहाः का-
र्याः। पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवमिति श्लोक्योक्तेः। पितृशब्दस्य पितृभार्यापन्नमात्रपरत्वात्। जनकपरत्वे बहुव

Indira Gandhi National
Centre for the Arts

चनासामंजसंस्यात्। आब्दिके तु वचनान्निवर्तिः। अथ महालयः। पृथ्वीचंद्रोदये वृद्धमनुः। आषाढीमवधिं कृत्वा पंचमं प
क्षमाश्रिताः। कांक्षंति पितरः क्लिष्टा अन्नमप्यन्वहं जलं। श्रीमार्कंडेयपयोः। कन्यागते सवितरि यान्यहानि तु षोडश।
क्रतुभिस्तानि तुल्यानि इस्फुदाहृतं षोडशत्वं त्रेधाव्यातं। तिथिवृद्ध्या पक्षस्य षोडशदिनत्वे श्राद्धवृद्धयर्थं इत्येकः पक्षः।
भाद्रपदपूर्णिमासहेति द्वितीयः। आश्विनशुक्लप्रतिपदासहेति तृतीयः। इत्थं पंच पक्षाः। पक्षः १ पंचम्यादिः २ अष्ट
म्यादिः ३ दशम्यादिः ४ एकस्मिन्दिने वा श्राद्धमिति ५ तथा च गोतमः। अथापरपक्षे श्राद्धं पितृभ्यो दद्यात्पंचम्यादि द
र्शांतं अष्टम्यादि दशम्यादि सर्वस्मिन्वेति हेमाद्रौ नागरखंडे। आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। यो वै श्रा
द्धं नरः कुर्यादेकस्मिन्नपि वासरे। तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवमिति। स च महालयो वर्ज्यतिथ्यादिकं पृथ्वी
चंद्रोदये। प्रयोगपारिजातादौ उक्तं वशिष्ठः। नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु। एषु श्राद्धं न कुर्वीत गृही पु
त्रधनक्षयात्। जन्मभं त्रिषुत्तरे त्रिजन्मानि। अस्यापवादो हेमाद्रौ। अमापाते भरण्यां च द्वादश्यां पक्षमध्यके।
तथा। न तिथिं चैव नक्षत्रं वारं च न विचारयेत्। माधवीये तु। माधवीये मदनरत्नपारिजातादिष्वप्येवं। निर्णयदीपि
कायां तु पितृमृताहे विसर्वत्र निषेधापवाद उक्तः। आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। मृताहनि तु पितु १६
यो वै श्राद्धं दास्यमानवः। तस्य संवत्सरं यावत्तृप्ताः पितरो ध्रुवमिति नागरखंडोक्तेः। याति थियस्य पितास्य मृता

हे तु प्रवर्तते। सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः इति। कात्यायनोक्तेश्च। अत्रिः। महालये क्षयाहे च दर्शो
पुत्रस्य जन्मनि। तीर्थे च निर्वपेत्पिंडान्रविवारादिकेष्वपि। कात्यायनः। अश्वयुक्पक्षमध्ये तु करोत्येकदिने यदा।
निषिद्धे पि दिने कुर्यात्पिंडदानं यथाविधि। यत्तु स्मृत्यर्थसारे। विवाहव्रतचूडासु वर्षमर्धं तदर्धकं। पिंडदा
नं मृदा स्नानं न कुर्यात्तिलतर्पणं। अस्यापवादमाह। दिवोदासीये बृहस्पतिः। श्रीतीर्थे संवत्सरे प्रेते पितृयागे म
हालये। पिंडदाने प्रकुर्वीत युगादिभरणीमघे। महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि। कृतोद्वाहोऽपि कुर्वीत
पिंडनिर्वापणं सदेति। संन्यासिनां तु द्वादश्यां श्राद्धं कार्यं विशेषतः। यतीनां च वनस्थानां वैष्णवानां विशेषतः॥
द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः इति पृथ्वीचंद्रोदये संग्रहोक्तेः। इदं च श्राद्धमन्ने नैव कर्तव्यं। मृताहे च
सपिंडं च गयाश्राद्धं महालयं। आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित्। इति स्मृतिदर्पणे गालवोक्तेः।
अथात्र देवताः संग्रहे वचनं। तातांबात्रितयं सपत्निजननी मातामहादित्रयं सस्त्री स्त्रीतनयादि तातजननी
स्वभ्रातरः सस्त्रियः। तातांबात्मभगिन्यपत्यधवयुग्जायापितासद्गुरुः शिष्याप्ताः पितरो महालयविधौ
तीर्थे तथा तर्पणे। अस्यार्थः। तातत्रयी मातृत्रयी च। अत्र विशेषः स्मृतिदर्पणे गालवोक्तः। अनेकमातरो यस्य

चनासामंजसं स्यात्। आब्दिके तु वचनान्निवृत्तिः। अथ महालयः। पृथ्वीचंद्रोदये वृद्धमनुः। आषाढीमवधिं कृत्वा पंचमं प
क्षमाश्रिताः। कांक्षंति पितरः क्लिष्टा अन्नमप्यन्वहं जलं। श्रीलमार्कंडेययोः। कन्यागते सवितरि यान्यहानि तु षोडश।।
क्रतुभिस्तानि तुल्यानि इत्युदाहृत षोडशत्वं त्रेधा व्याख्यातं। तिथिवृद्ध्या पक्षस्य षोडशदिनत्वे श्राद्धवृद्ध्यर्थं इत्येकः। पक्षः।
भाद्रपदपूर्णिमासहेति द्वितीयः। आश्विनशुक्लप्रतिपदा सहेति तृतीयः। इह पंच पक्षाः। पक्षः १ पंचम्यादिः २ अष्ट
म्यादिः ३ दशम्यादिः ४ एकस्मिन्नु दिने वा श्राद्धमिति ५ तथा च गौतमः। अथापरपक्षे श्राद्धं पितृभ्यो दद्यात् पंचम्यादिद
शम्यांतं अष्टम्यादिदशम्यादि सर्वस्मिन्वेति हेमाद्रौ नागरखंडे। आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। यो वै श्रा
द्धं नरः कुर्यादेकस्मिन्नपि वासरे। तस्य संवत्सरं यावत्संतुष्टाः पितरो ध्रुवमिति। स च महालये वर्ज्यतिथ्यादिकं पृथ्वी
चंद्रोदये। प्रयोगपारिजातादौ तु उक्तं वशिष्ठः। नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु। एषु श्राद्धं न कुर्वीत गृही पु
त्रधनक्षयात्। जन्मभं त्रिष्वुत्तरे त्रिजन्मानि। अस्यापवादो हेमाद्रौ। अमापाते भरण्यां च द्वादश्यां पक्षमध्यके।
तथा। न तिथिं न च नक्षत्रं वारं च न विचारयेत्। माधवीये तु। माधवीये मदनरत्नपारिजातादिष्वप्येवं। निर्णयदीपि
कायां तु पितृमृताहे विसर्वत्र निषेधापवाद उक्तः। आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। मृताहनि पितु १६
र्यो वै श्राद्धं दास्यमानवः। तस्य संवत्सरं यावत्तृप्ताः पितरो ध्रुवमिति नागरखंडोक्तेः। या तिथिर्यस्य तातस्य मृता

हे तु प्रवर्तते। सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः इति। कात्यायनोक्तेश्च। अत्रिः। महालये क्षयाहे च दर्शे
पुत्रस्य जन्मनि। तीर्थे च निर्वपेत्पिंडान् रविवारादिकेष्वपि। कात्यायनः। अथोक्त पक्षमध्ये तु करोत्येकदिने यदा।
निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधि। यथाविधि। यत्तु स्मृत्यर्थसारे। विवाहव्रतचूडासु वर्षमर्द्धं तदर्धकं। पिंडदा
नं मृद्स्नानं न कुर्यात्तिलतर्पणं। अस्यापवादमाह। दिवोदासीये बृहस्पतिः। श्रीतीर्थे संवत्सरे प्रेते पितृयागे म
हालये। पिंडदाने प्रकुर्वीत युगादिभरणीमघे। महालये गयाश्राद्धे मातापित्रोर्मृतेहनि। कृतोद्वाहोपि कुर्वीत प
पिंडनिर्वापमुत्सदेति। सन्न्यासिनां तु द्वादश्यां श्राद्धं कार्यं विशेषतः। यतीनां च वनस्थानां वैष्णवानां विशेषतः।।
द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः इति पृथ्वीचंद्रोदये संग्रहोक्तेः। इदं च श्राद्धमन्नेनैव कर्तव्यं। मृताहं न
सपिंडं च गयाश्राद्धं महालयं। आपन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचित्। इति स्मृतिदर्पणे गालवोक्तेः।
अथात्र देवताः संग्रहे वचनं। तातांबात्रितयं सपत्निजननी मातामहादित्रयं सस्त्री स्त्रीतनयादि तातजननी
स्वभ्रातरः सस्त्रियः। तातांबात्मभगिन्यपत्यधवयुग्जाया पिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ
तीर्थे तथा तर्पणे। अस्यार्थः। तातत्रयी मातृत्रयी च। अत्र विशेषः स्मृतिदर्पणे गालवोक्तः। अनेकमातरो यस्य

Indira Gandhi National
Centre for the Arts

श्राद्धे चापरपक्षके। अर्घ्यदानं पृथक्कुर्यात् पिंडदाने च निर्वपेत्। जीवन्मातृकस्तु सापत्नमातुरेकोद्दिष्टं
कुर्यात् न पार्वणं। सप्तर्षीतिः। मातामहादित्रयं सपत्नीकमित्यर्थः। तथा च नवदैवत्यमुक्तं हेमाद्रौ। महाल
ये गयाश्राद्धे वृद्धौ चान्वष्टकासु च। नवदैवतमेवेष्टं शेषं षाट्पौरुषं विदुः। विभवे सति मातामहादीनां पृ
थक्कार्यं। महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च। तेयं द्वादशदैवत्यं तीर्थे मघासु चेति निगमोक्तेः॥
तातभ्रातापितृव्यश्च जननीभ्रातामातुलं [illegible] बालः तस्त्रियः। पितृव्यास्त्रियः मातुला
नीभ्रातृजाया पितृष्वसृ मातृष्वसृ स्वभगिन्यपत्यभर्तृयुताः तेन सापत्या ये सधवा ये इति प्र
योगः। एतासु सत्सु तत्तद्भर्त्रादिरुद्देशे तद्वारत्वोपात्। जाया पिता श्वशुरः अत्र श्वशुरपि बोध्या।
तथा च हेमाद्रौ। उपाध्यायगुरुश्वशुरपितृव्याचार्यमातुलाः। श्वशुरभ्रातृतत्पुत्रस्त्रीशिष्याः
पोषकाः भगिनी स्वामिदौहित्रयामातृभगिनीसुताः। पितरः पितृपत्नीनां पितुर्मातुश्च यास्वसा।
सखि द्रव्य दशिष्याद्यास्तीर्थे चैव महालये। एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः। अत्र क्रम १८
न्यत्वे यथाचारव्यवस्थाः। अत्राशक्तौ चतुर्विंशतिमतं। एकस्मिन् ब्राह्मणे सर्वानाचार्यादीन् प्र

पूजयेत्॥ दशाद्वादशवा पिंडान् दद्याद्दशाकरणं नतु॥ विधवायास्तु विशेषः। स्मृतिसंग्रहे। चत्वारि पार्वणानि
द्वे विधवायाः सदैव हि। स्वभर्तृश्वशुरादीनां माता पित्रोस्तथैव च। ततो मातामहानां च श्राद्धदानमुपक्रमे
त्। तथा श्वश्रूणां च विशेषेण मातामह्यास्तथैव च। विधवाकारयेच्छ्राद्धं यथाकालमतंद्रिता। विधवा
स्वयं संकल्पं कृत्वान्यब्राह्मणद्वारा कारयेदित्युक्तं। प्रयोगपारिजाते। अत्रैकः पाको वैश्वदेवतंत्रं वि
हितश्चैकमिति स्मृतिसारे। अत्रैकोद्दिष्टेषु पाणिहोमः। पिंडांश्च द्विजाः तिकः इत्याचार्याः धरि लोचने
विश्वेदेवे प्रतिदिनं च प्रयोगभेदाद्दक्षिणाभेदः। प्रयोगे स्यादेव वा दक्षिणेति कालहेमाद्रौ स्थितं। एतस्य
संन्यस्तपितृकेण जीवत्पितृकेणापि कार्यं। वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति। एभ्य एव पितादद्या
तेभ्यो दद्यात्स्वयं सुत इति कात्यायनोक्तेः। यत्तु कौंडिन्यः। दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं।
न जीवत्पितृकेण पिंडरहितं कार्यं। मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः। न जीवत्पितृकः कुर्याद्गुर्वि
णीपतिरेव चेति दक्षोक्तेः॥ अन्वष्टक्यां मातृवार्षिकादौ च न भवति। तथा छागलेयः। पिंडोपत्र्यपत्रनिवर्ते
तमघादिकं यच्च दीन। सांकल्प्यं तु तदा कार्यं नियमाद्ब्रह्मवादिभिः। अत्र श्राद्धांगतर्पणं। पक्षश्राद्धप्रति

Indira Gandhi National Centre for the Arts

दिनश्राद्धोत्तरं। सकृन्महालयेतु परेह्नि कार्यं। तदुक्तं नारदीये। पक्षश्राद्धं यदा कुर्यात्तर्पणं च दिने दिने। सकृ
न्महालये चैव परेहनि तिलोदकमिति। यत्तु संग्रहे। पक्षश्राद्धे हिरण्ये च परेहनि तिलोदकमिति तत्सकृन्म
हालय विषयं। प्रयोगपारिजाते गर्गः। कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत्। पितॄणां प्रत्यहं कार्यं निषि
द्धाहे पितर्पणं। इदं च नित्यं काम्यं। मलमासेपि न कार्यं। पित्रोर्मरणे प्रथमाब्दे तु कृताकृतमिति त्रिस्थली से
तौ। अत्र श्राद्धं भरण्यामतिप्रशस्तं। तदुक्तं मात्स्ये। भरणी पितृपक्षे तु महती परिकीर्तिता। अस्यां श्राद्धं कृ
भे६ तं येन स गयाश्राद्धकृद्भवेत्। षष्ठी चंद्रोदये। नभस्यापरपक्षस्य द्वितीयायदि याम्यभे। तृतीया चाग्नि
ताराभिः सहितातिप्रीतिदा पितुः। अस्मिन्पक्षे कपिलाषष्ठी तदुक्तं वाराहे। नभस्य कृष्णपक्षे तु रोहिणीपा
तभस्तुतेः। युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता। व्रतोपवासनियमैर्भास्करं तत्र पूजयेत्। कपिलां च
द्विजाग्र्याय दत्वा क्रतुफलं लभेत्। अत्रैव हस्तार्के फलातिशायनं यात्मते पुराणसमुच्चये च। भाद्रे मासि सिते
पक्षे भानौ चैव करे स्थिते। पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत्। संयोगे तु चतुर्णां वै निर्दिष्टापर
मेष्ठिनेति। इयमेव चंद्रषष्ठी। तदुक्तं भविष्ये। तद्भाद्रपदे मासि षष्ठ्यां पक्षे सो~~वो घो ष्या प्रय त्नतः इ~~। अष्ट १८

~~म्यामाश्वलायनेन मघावर्षसंज्ञं~~ पक्षेसिते तरे। चंद्रषष्ठीव्रतं कुर्यात्सर्वपापैः प्रशस्यते। चंद्रोदये पर
षष्ठी स्यात्सा पूर्वाह्णे हनि। चंद्रषष्ठी सिते पक्षे सैवो पोष्या प्रयत्नत इति। अष्टम्यामाश्वलायनेन मघावर्ष
संज्ञं श्राद्धमुक्तं। एतेन माघावर्षं प्रोष्ठपद्या अपरपक्ष इदं सप्तम्यादिषु त्रिषु हस्सु कार्यमिति नारायण
वृत्तिः। हरदत्तस्तु मघायुक्त वर्षासु नवं त्रयोदशी श्राद्धमिति व्याचख्यौ। अत्रैव अष्टम्यां महालक्ष्मीव्र
तं। तत्र चंद्रोदयव्यापिनी ग्राह्या तत्रैव पूजायुक्तेः। परदिने चंद्रोदयात् पूर्वं त्रिमुहूर्ता विसा पूज्या पर
तश्चोर्ध्वगामिनीति मदनरत्ने संग्रहोक्तेः। अर्द्धरात्रमतिक्रांतिर्म्य वर्तते यो नराधिपः। तस्यां तस्यां ति
थौ कार्यं महालक्ष्मीव्रतं सदेति वचनाच्च। अत्र नवम्यामन्वष्टका श्राद्धं। तत्र कात्यायनः। अन्वष्टकासु
नवभिः पिंडैः श्राद्धमुदाहृतं। पित्रादिमातृमध्यं च ततो मातामहांतकं। पृथ्वीचंद्रोदये। ब्रह्मांडे। पितॄणां
प्रथमं दद्यान्मातॄणां तदनंतरं। ततो मातामहानां च अन्वष्टक्ये क्रमः स्मृतः। श्राद्धे हेमाद्रौ छागलेयः।
केवलास्तु स्वयं कार्या वृद्धावादौ प्रकीर्तिताः। अन्वष्टकासु मध्यस्थानां त्याः कार्यास्तु मातरः। दीपिकायां

Indira Gandhi National Centre for the Arts

तु। मातुः श्राद्धमादौ कार्यमित्युक्तं। तथा च निर्णयामृते। मैत्रायणीयपरिशिष्टे। अन्वष्टक्यं गयाप्राप्तौ सत्यां
पञ्च मृते ऽहनि। मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति। यद्यपि जीवत्पितृकस्य पंचाप्यन्वष्टका अवश्यक
र्तव्यास्तथाप्यशक्तस्यैतमावश्यकी। अत्र स्वमातरि जीवंत्यामपि सापत्नमातृभ्यो दद्यात्। सर्वासामेव
मातॄणां श्राद्धं कन्यागते रवौ। नवम्यां हि प्रदातव्यमक्षय्यं वरायन इति स्मृत्युक्तेः। सर्वासामिति कथ
नात्। अत्र सर्वासां नामनिर्देशो नैको ब्राह्मणो ऽर्घ्यः पिंडश्च। नामैक्ये तु द्विवचनादि प्रयोग इति नारायण
वृत्तौ। अत्र भर्तृमरणानंतरं मातुः श्राद्धं न कार्यमिति मन्वानाः केचित्पठंति। श्राद्धं नवम्यां कुर्यात्तन्मृते तेन
च ७ नारि लुप्यत इति तन्निर्मूलमिति प्रामाणिकाः। इदं जीवत्पितृकेणापि सपिंडं कार्यं। हेमाद्रौ विष्णुधर्मोत्तरे
अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव च। इत्यत्र पक्षमप्यपिंडनिर्वपणं कार्यमित्युक्तत्वात्। इह हि भर्तृ
दिष्टादेव पिंडदाने प्राप्ते जीवत्पितृक ... गर्भिणीपतित्वादिप्रयुक्तनिषेधादिस्थत्वे ऽप्रतिप्रसवार्थं तदुक्तेः।
अत्र च सुवासिनीभोजनमुक्तं मार्कंडेयेन। मातुः श्राद्धे तु संप्राप्ते ब्राह्मणैः सह भोजनं। सुवासिन्यै प्रदात
व्यमिति शातातपो ऽब्रवीत्। भर्तुरग्रे मृता नारी सह दाहेन वा मृता। तस्याः स्थाने नियुंजीत विप्रैः स १९

ह सुवासिनीं। तत्रैव मदालसावाक्यं। स्त्रीश्राद्धेषु प्रदेयाः स्युरलंकाराश्च योषितां। मंजीरमेखलादामकर्णिकाकंक
६२ णादयः इति। अत्रैव त्रयोदश्यां महालयं। मघायुक्तायामतीव प्रशस्तं। एतच्चाविभक्तैरपि पृथक्कार्यं॥ तथा च
हेमाद्रौ। अविभक्ता विभक्ता वा कुर्युः श्राद्धं पृथक्सुताः। मघासु च ततो ऽन्यत्र नाधिकारः पृथग्विनेति। अप
रार्केऽपि वायवीये। हंसे करस्थिते या तु मघायुक्ता त्रयोदशी। तिथिर्वैवस्वती नाम सा छाया कुंजरस्य तु। अत्र
पिंडा न देयाः। इदं मलमासे ऽपि कार्यं। मघात्रयोदशी कार्या प्रत्यक्षपरिस्थितिहेतुका। अनन्यगतिकत्वेन कर्तव्या
स्यान्मलेऽपि चेति काठकगृह्योक्तेः। अत्र मघात्रयोदशीमहालययुगादिश्राद्धानां तंत्रेण प्रयोगः। अत्र
चतुर्दशी॥ तत्र शस्त्रहतानां श्राद्धं॥ एतच्च दैवयुक्तमेकोद्दिष्टमित्युक्तं प्रयोगपारिजाते। प्रेतपक्षे च
तुर्दश्यामेकोद्दिष्टं विधानतः। दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत्। तथा। तच्छ्राद्धं दैवहीनं चेत्स्युरदारथ
नक्षयः। एकोद्दिष्टं दैवयुक्तमित्येवं मनुरब्रवीत्। पितामहो ऽपि दुर्मृतस्यैकोद्दिष्टं ह्ययं कार्यं॥ यत्तु दैवस्याभि
नोक्तं। त्रिघ्नपि शस्त्रघातादिभिर्हताः। सम्भूते पार्वणं कुर्यादाब्दिकानि पृथक्पृथक् इति बृहत्पराशरोक्तेः।
एकस्मिन्नब्दे द्वयोर्वापि विद्युच्छस्त्रादिभिर्हते। एकोद्दिष्टं सुतः कुर्याच्चयाणं दर्शवद्भवेत्। इति चन्द्रोदय

Indira Gandhi National
Centre for the Arts

वचनाच्च ॥ अपरार्के हेमाद्रौ चैवं ॥ यस्त्वेवं शास्त्रादिना हतस्तस्य वार्षिके तौ वास्य प्रसंगसिद्धेन पृथगनुष्ठानमि
ति ॥ पृथ्वीचंद्रोदये । अत्र अमाकरणे दिनांतरे पार्वणमेव कार्यमिति तत्रैव स्थितं ॥ अमायां विशेषमाह अपरा
र्के यमः । सूर्ये हंसस्थिते यातु अमावास्या करान्विता । साद्रेया कुञ्जरच्छाया इति बौधायनोब्रवीत् ॥ इति भाद्रप
दनिर्णयः । अथाश्विनस्य शुक्लप्रतिपदादौ हि अप्रतिपदा । तस्यां मातामहश्राद्धं कुर्यात् । उक्तं चहेमा
द्रौ । जातमात्रोपि दौहित्रो जीवत्यपि च मातुले । कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सित इति । इयं
च संगवव्यापिनी ग्राह्येति निर्णयदीपे उक्तं । प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं । श्राद्धं मा
तामहं कुर्यात्सपितासंगवे सिते । जातमात्रोपि दौहित्रो जीवत्यपि च मातुले । आतः संगवयोर्म
ध्ये पार्श्वयुक् प्रतिपद्भवेदिति वचनात् । अत्र सपितेति विशेषणाज्जीवत्पितृक एवाधिकारी ।
अत एव पिंडरहितं श्राद्धं कुर्यात् । मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः । न जीवत्पितृकः कुर्या
द्गुर्विणीपतिरेव चेति दक्षवचनात् । अन्वष्टक्यादिशेषवचनात् । अत्रैव नवरात्रप्रारंभः । त
त्र परविद्धा ग्राह्या । तदुक्तं गोविंदार्णवे मार्कंडेय देवीपुराणयोः । पूर्वविद्धा तु या शुक्ला भवे २०

त्प्रतिपदाश्विनी । नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता । देशभंगो भवेत्तत्र दुर्भिक्षं चोपजायते । नंदा
यां दर्शयुक्तायां यत्र स्यान्मम पूजनमिति । तथा च लैंगे देवीपुराणे । न दर्शकलया युक्ता प्रतिपच्चंडि
कार्चने । उदये द्विमुहूर्तापि ग्राह्या सोदयकारिणीति । यदा तु पूर्वदिने शुद्धापि भूत्वा परदिने वर्द्धते
तदा पूर्वैव संपूर्णत्वादमायोगाभावाच्च । यानि तु द्वितीयायो

Indira Gandhi National
Centre for the Arts

33247(29)

Indira Gandhi National
Centre for the Arts